[1]ज्ञीप्सकः-प्सिका ; ज्ञपयिता-त्री, जिज्ञपयिषिता-त्री, ज्ञीप्सिता-त्री ;
ज्ञपयन्-न्ती, [A]विज्ञपयन् , जिज्ञपयिषन्-न्ती, ज्ञीप्सन्-न्ती ;
ज्ञपयिष्यन्-न्ती-ती, जिज्ञपयिषिष्यन्-न्ती-ती, ज्ञीप्सिष्यन्-न्ती-ती ;
ज्ञपयमानः, जिज्ञपयिषमाणः, ज्ञीप्समानः ;
ज्ञपयिष्यमाणः, जिज्ञपयिषिष्यमाणः, ज्ञीप्सिष्यमाणः ;
[2]प्रज्ञप्-प्रज्ञब्-प्रज्ञपौ-प्रज्ञपः ; — —
[3]ज्ञपितः-ज्ञप्तः-ज्ञप्तवान् , जिज्ञपयिषितः-ज्ञीप्सितः-तवान् ;
ज्ञपः, जिज्ञपयिषुः-ज्ञीप्सुः; ज्ञपयितव्यम् , जिज्ञपयिषितव्यम्-ज्ञीप्सितव्यम् ;
ज्ञपनीयम् , जिज्ञपयिषणीयम्-ज्ञीप्सनीयम् ; ज्ञप्यम् , जिज्ञपयिष्यम्-ज्ञीप्स्यम् ;
ईषज्ज्ञपः-दुर्ज्ञपः-सुज्ञपः ; — —
ज्ञप्यमानः, जिज्ञपयिष्यमाणः-ज्ञीप्स्यमानः ; ज्ञपः, जिज्ञपयिषः-ज्ञीप्सः ;
ज्ञपयितुम् , जिज्ञपयिषितुम्-ज्ञीप्सितुम् ; ज्ञपना, [4]ज्ञप्तिः, जिज्ञपयिषा-ज्ञीप्सा ;
ज्ञपनम् , जिज्ञपयिषणम्-ज्ञीप्सनम् ; ज्ञपयित्वा, जिज्ञपयिषित्वा-ज्ञीप्सित्वा ;
[5]विज्ञपय्य, प्रजिज्ञपयिष्य-प्रज्ञीप्स्य ;
[6]ज्ञपम् २-ज्ञापम् २, ज्ञपयित्वा २, } जिज्ञपयिषम् २-ज्ञीप्सम् २ ; जिज्ञपयिषित्वा २-ज्ञीप्सित्वा २. }

---

1. 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्' (7-2-49) इति सूत्रेण सन इड्विकल्पः। इडभावपक्षे, 'आप्ज्ञप्यृधामीत्' (7-4-55) इतीत्त्वे, 'सन्यङोः' (6-1-9) इति द्वित्वे, 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपे रूपमेवम् । एवं सन्नन्ते सर्वत्रेडभावपक्षे रूपम् , इट्पक्षे तु जिज्ञपयिषकः इत्यादीनि रूपाणीति च ज्ञेयम् ।
2. क्विपि, क्विब्लोपे, णिलोपे चर्त्वविकल्पे च रूपम् ।
3. 'वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः' (7-2-27) इति सूत्रेण इण्णिषेधो विकल्पेन भवति । तेन रूपद्वयम् ।
4. बाहुलकात् क्तिन् । 'तितुत्र—' (7-2-9) इतीण्णिषेधः ।
5. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः ।
6. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुल्परे णौ दीर्घविकल्पः ।

A. 'चाणूर एनमथ विज्ञपयन् नृपाज्ञां चण्डातकं सुयमयंश्च्युहको बभाषे।'
धा. का. 3.25